# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ६१

तयोस्तदा सादितयो रणाग्रे
मुमोह सैन्यं हरियूथपानाम् ।
सुग्रीवनीलाङ्गदजाम्बवन्तो
न चापि किं चित्प्रतिपेदिरे ते ॥ १॥

ततो विषण्णं समवेक्ष्य सैन्यं
विभीषणो बुद्धिमतां वरिष्ठः ।
उवाच शाखामृगराजवीरान्
आश्वासयन्नप्रतिमैर्वचोभिः ॥ २॥

मा भैष्ट नास्त्यत्र विषादकालो
यदार्यपुत्रावववशौ विषण्णौ ।
स्वयम्भुवो वाक्यमथोद्वहन्तौ
यत्सादिताविन्द्रजिदस्त्रजालैः ॥ ३॥

तस्मै तु दत्तं परमास्त्रमेतत्
स्वयम्भुवा ब्राह्मममोघवेगम् ।
तन्मानयन्तौ यदि राजपुत्रौ
निपातितौ कोऽत्र विषादकालः ॥ ४॥

ब्राह्ममस्त्रं तदा धीमान्मानयित्वा तु मारुतिः ।
विभीषणवचः श्रुत्वा हनूमांस्तमथाब्रवीत् ॥ ५॥

एतस्मिन्निहते सैन्ये वानराणां तरस्विनाम् ।
यो यो धारयते प्राणांस्तं तमाश्वासयावहे ॥ ६॥

तावुभौ युगपद्वीरौ हनूमद्राक्षसोत्तमौ ।
उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः ॥ ७॥

छिन्नलाङ्गूलहस्तोरुपादाङ्गुलि शिरो धरैः ।
स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिः समन्ततः ॥ ८॥

पतितैः पर्वताकारैर्वानरैरभिसङ्कुलाम् ।
शस्त्रैश्च पतितैर्दीप्तैर्ददृशाते वसुन्धराम् ॥ ९॥

सुग्रीवमङ्गदं नीलं शरभं गन्धमादनम् ।
जाम्बवन्तं सुषेणं च वेगदर्शनमाहुकम् ॥ १०॥

मैन्दं नलं ज्योतिमुखं द्विविदं पनसं तथा ।
विभीषणो हनूमांश्च ददृशाते हतान्रणे ॥ ११॥

सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम् ।
अह्नः पञ्चमशेषेण वल्लभेन स्वयम्भुवः ॥ १२॥

सागरौघनिभं भीमं दृष्ट्वा बाणार्दितं बलम् ।
मार्गते जाम्बवन्तं स्म हनूमान्सविभीषणः ॥ १३॥

स्वभावजरया युक्तं वृद्धं शरशतैश् चितम् ।
प्रजापतिसुतं वीरं शाम्यन्तमिव पावकम् ॥ १४॥

दृष्ट्वा तमुपसङ्गम्य पौलस्त्यो वाक्यमब्रवीत् ।
कच्चिदार्यशरैस्तीर्ष्णैर्न प्राणा ध्वंसितास्तव ॥ १५॥

विभीषणवचः श्रुत्वा जाम्बवानृक्षपुङ्गवः ।
कृच्छ्रादभ्युद्गिरन्वाक्यमिदं वचनमब्रवीत् ॥ १६॥

नैरृतेन्द्रमहावीर्यस्वरेण त्वाभिलक्षये ।
पीड्यमानः शितैर्बाणैर्न त्वां पश्यामि चक्षुषा ॥ १७॥

अञ्जना सुप्रजा येन मातरिश्वा च नैरृत ।
हनूमान्वानरश्रेष्ठः प्राणान्धारयते क्व चित् ॥ १८॥

श्रुत्वा जाम्बवतो वाक्यमुवाचेदं विभीषणः ।
आर्यपुत्रावतिक्रम्य कस्मात्पृच्छसि मारुतिम् ॥ १९॥

नैव राजनि सुग्रीवे नाङ्गदे नापि राघवे ।
आर्य सन्दर्शितः स्नेहो यथा वायुसुते परः ॥ २०॥

विभीषणवचः श्रुत्वा जाम्बवान्वाक्यमब्रवीत् ।
शृणु नैरृतशार्दूल यस्मात्पृच्छामि मारुतिम् ॥ २१॥

तस्मिञ्जीवति वीरे तु हतमप्यहतं बलम् ।
हनूमत्युज्झितप्राणे जीवन्तोऽपि वयं हताः ॥ २२॥

ध्रियते मारुतिस्तात मारुतप्रतिमो यदि ।
वैश्वानरसमो वीर्ये जीविताशा ततो भवेत् ॥ २३॥

ततो वृद्धमुपागम्य नियमेनाभ्यवादयत् ।
गृह्य जाम्बवतः पादौ हनूमान्मारुतात्मजः ॥ २४ ॥

श्रुत्वा हनुमतो वाक्यं तथापि व्यथितेन्द्रियः ।
पुनर्जातमिवात्मानं स मेने ऋक्षपुङ्गवः ॥ २५ ॥

ततोऽब्रवीन्महातेजा हनूमन्तं स जाम्बवान् ।
आगच्छ हरिशार्दूलवानरांस्त्रातुमर्हसि ॥ २६ ॥

नान्यो विक्रमपर्याप्तस्त्वमेषां परमः सखा ।
त्वत्पराक्रमकालोऽयं नान्यं पश्यामि कञ् चन ॥ २७ ॥

ऋक्षवानरवीराणामनीकानि प्रहर्षय ।
विशल्यौ कुरु चाप्येतौ सादितौ रामलक्ष्मणौ ॥ २८ ॥

गत्वा परममध्वानमुपर्युपरि सागरम् ।
हिमवन्तं नगश्रेष्ठं हनूमन्गन्तुमर्हसि ॥ २९ ॥

ततः काञ्चनमत्युग्रमृषभं पर्वतोत्तमम् ।
कैलासशिखरं चापि द्रक्ष्यस्यरिनिषूदन ॥ ३० ॥

तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभम् ।
सर्वौषधियुतं वीर द्रक्ष्यस्यौषधिपर्वतम् ॥ ३१ ॥

तस्य वानरशार्दूलचतस्रो मूर्ध्नि सम्भवाः ।
द्रक्ष्यस्योषधयो दीप्ता दीपयन्त्यो दिशो दश ॥ ३२ ॥

मृतसञ्जीवनीं चैव विशल्यकरणीम् अपि ।
सौवर्णकरणीं चैव सन्धानीं च महौषधीम् ॥ ३३ ॥

ताः सर्वा हनुमन्गृह्य क्षिप्रमागन्तुमर्हसि ।
आश्वासय हरीन्प्राणैर्योज्य गन्धवहात्मजः ॥ ३४ ॥

श्रुत्वा जाम्बवतो वाक्यं हनूमान्हरिपुङ्गवः ।
आपूर्यत बलोद्धर्षैस्तोयवेगैरिवार्णवः ॥ ३५ ॥

स पर्वततटाग्रस्थः पीडयन्पर्वतोत्तरम् ।
हनूमान्दृश्यते वीरो द्वितीय इव पर्वतः ॥ ३६ ॥

हरिपादविनिर्भिन्नो निषसाद स पर्वतः ।
न शशाक तदात्मानं सोढुं भृशनिपीडितः ॥ ३७ ॥

तस्य पेतुर्नगा भूमौ हरिवेगाच्च जज्वलुः ।
शृङ्गाणि च व्यकीर्यन्त पीडितस्य हनूमता ॥ ३८ ॥

तस्मिन्सम्पीड्यमाने तु भग्नद्रुमशिलातले ।
न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे ॥ ३९ ॥

स घूर्णितमहाद्वारा प्रभग्नगृहगोपुरा ।
लङ्का त्रासाकुला रात्रौ प्रनृत्तेवाभवत्तदा ॥ ४० ॥

पृथिवीधरसङ्काशो निपीड्य धरणीधरम् ।
पृथिवीं क्षोभयामास सार्णवां मारुतात्मजः ॥ ४१ ॥

पद्भ्यां तु शैलमापीड्य वडवामुखवन्मुखम् ।
विवृत्योग्रं ननादोच्चैस्त्रासयन्निव राक्षसान् ॥ ४२ ॥

तस्य नानद्यमानस्य श्रुत्वा निनदमद्भुतम् ।
लङ्कास्था राक्षसाः सर्वे न शेकुः स्पन्दितुं भयात् ॥ ४३ ॥

नमस्कृत्वाथ रामाय मारुतिर्भीमविक्रमः ।
राघवार्थे परं कर्म समैहत परन्तपः ॥ ४४ ॥

स पुच्छमुद्यम्य भुजङ्गकल्पं
विनम्य पृष्ठं श्रवणे निकुञ्च्य ।
विवृत्य वक्त्रं वडवामुखाभम्
आपुप्लुवे व्योम्नि स चण्डवेगः ॥ ४५ ॥

स वृक्षषण्डांस्तरसा जहार
शैलाञ्शिलाः प्राकृतवानरांश् च ।
बाहूरुवेगोद्धतसम्प्रणुन्नास्
ते क्षीणवेगाः सलिले निपेतुः ॥ ४६ ॥

स तौ प्रसार्योरगभोगकल्पौ
भुजौ भुजङ्गारिनिकाशवीर्यः ।
जगाम मेरुं नगराजमग्र्यं
दिशः प्रकर्षन्निव वायुसूनुः ॥ ४७ ॥

स सागरं घूर्णितवीचिमालं
तदा भृशं भ्रामितसर्वसत्त्वम् ।
समीक्षमाणः सहसा जगाम
चक्रं यथा विष्णुकराग्रमुक्तम् ॥ ४८ ॥

स पर्वतान्वृक्षगणान्सरांसि
नदीस्तटाकानि पुरोत्तमानि ।
स्फीताञ्जनांस्तानपि सम्प्रपश्यञ्
जगाम वेगात्पितृतुल्यवेगः ॥ ४९ ॥

आदित्यपथमाश्रित्य जगाम स गतश्रमः ।
स ददर्श हरिश्रेष्ठो हिमवन्तं नगोत्तमम् ॥ ५० ॥

नानाप्रस्रवणोपेतं बहुकन्दरनिर्झरम् ।

श्वेताभ्रचयसङ्काशैः शिखरैश्चारुदर्शनैः ॥ ५१॥

स तं समासाद्य महानगेन्द्रम्
अतिप्रवृद्धोत्तमघोरशृङ्गम् ।
ददर्श पुण्यानि महाश्रमाणि
सुरर्षिसङ्घोत्तमसेवितानि ॥ ५२॥

स ब्रह्मकोशं रजतालयं च
शक्रालयं रुद्रशरप्रमोक्षम् ।
हयाननं ब्रह्मशिरश्च दीप्तं
ददर्श वैवस्वत किङ्करांश् च ॥ ५३॥

वज्रालयं वैश्वरणालयं च
सूर्यप्रभं सूर्यनिबन्धनं च ।
ब्रह्मासनं शङ्करकार्मुकं च
ददर्श नाभिं च वसुन्धरायाः ॥ ५४॥

कैलासमग्र्यं हिमवच्छिलां च
तथर्षभं काञ्चनशैलमग्र्यम् ।
स दीप्तसर्वौषधिसम्प्रदीप्तं
ददर्श सर्वौषधिपर्वतेन्द्रम् ॥ ५५॥

स तं समीक्ष्यानलरश्मिदीप्तं
विसिष्मिये वासवदूतसूनुः ।
आप्लुत्य तं चौषधिपर्वतेन्द्रं
तत्रौषधीनां विचयं चकार ॥ ५६॥

स योजनसहस्राणि समतीत्य महाकपिः ।
दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः ॥ ५७॥

महौषध्यस्तु ताः सर्वास्तस्मिन्पर्वतसत्तमे ।
विज्ञायार्थिनमायान्तं ततो जग्मुरदर्शनम् ॥ ५८॥

स ता महात्मा हनुमानपश्यंश्
चुकोप कोपाच्च भृशं ननाद ।
अमृष्यमाणोऽग्निनिकाशचक्षुर्
महीधरेन्द्रं तमुवाच वाक्यम् ॥ ५९॥

किमेतदेवं सुविनिश्चितं ते
यद्राघवे नासि कृतानुकम्पः ।
पश्याद्य मद्बाहुबलाभिभूतो
विकीर्णमात्मानमथो नगेन्द्र ॥ ६०॥

स तस्य शृङ्गं सनगं सनागं
सकाञ्चनं धातुसहस्रजुष्टम् ।
विकीर्णकूटं चलिताग्रसानुं
प्रगृह्य वेगात्सहसोन्ममाथ ॥ ६१॥

स तं समुत्पाट्य खमुत्पपात
वित्रास्य लोकान्ससुरान्सुरेन्द्रान् ।
संस्तूयमानः खचरैरनेकैर्
जगाम वेगाद्गरुडोग्रवीर्यः ॥ ६२॥

स भास्कराध्वानमनुप्रपन्नस्
तद्भास्कराभं शिखरं प्रगृह्य ।
बभौ तदा भास्करसंनिकाशो
रवेः समीपे प्रतिभास्कराभः ॥ ६३॥

स तेन शैलेन भृशं रराज
शैलोपमो गन्धवहात्मजस्तु ।
सहस्रधारेण सपावकेन
चक्रेण खे विष्णुरिवोद्धृतेन ॥ ६४॥

तं वानराः प्रेक्ष्य तदा विनेदुः
स तानपि प्रेक्ष्य मुदा ननाद ।
तेषां समुद्घुष्टरवं निशम्य
लङ्कालया भीमतरं विनेदुः ॥ ६५॥

ततो महात्मा निपपात तस्मिञ्
शैलोत्तमे वानरसैन्यमध्ये ।
हर्युत्तमेभ्यः शिरसाभिवाद्य
विभीषणं तत्र च सस्वजे सः ॥ ६६॥

तावप्युभौ मानुषराजपुत्रौ
तं गन्धमाघ्राय महौषधीनाम् ।
बभूवतुस्तत्र तदा विशल्याव्
उत्तस्थुरन्ये च हरिप्रवीराः ॥ ६७॥

ततो हरिर्गन्धवहात्मजस्तु
तमोषधीशैलमुदग्रवीर्यः ।
निनाय वेगाद्धिमवन्तमेव
पुनश्च रामेण समाजगाम ॥ ६८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com